W8UB38C

# सङ्कलनात्मकं मूल्याङ्कनम् – I (2014-15)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

समय : होरात्रयम् | पूर्णाङ्काः 90

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | - | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | - | 35 अङ्काः |

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** 10

यद्यपि संसारे बहूनि वस्तुनि सन्ति, परन्तु विद्यैव श्रेष्ठं धनमस्ति। अतएवोच्यते - विद्याधनं सर्वधनप्रधानम्। विद्यया मनुष्यः स्वकीयं कर्त्तव्यं जानाति सत् को धर्मः, कोऽधर्मः, किं कर्त्तव्यं, किम् अकर्त्तव्यम्, किं पुण्यम्, किं पापम्, किं कृत्वा लाभो भविष्यति? केन कार्येण वा हानिः भविष्यति? सः विद्या-प्राप्त्या सन्मार्गम् अनुवर्त्तितुं प्रयतते।

I. **एकपदेन उत्तरत।**

(i) सर्वश्रेष्ठं धनं किम् अस्ति?

(ii) विद्याप्राप्त्या मनुष्यः कम् अनुवर्तितुं प्रयतते?

II. **पूर्णवाक्येन उत्तरत।**

(i) मनुष्यः धर्मम् अधर्मम् वा कथं ज्ञातुं शक्नोति?

(ii) विद्यया मनुष्यः किं जानाति?

III. **यथानिर्देशम् उत्तरत -**

(i) जानाति इति क्रियायाः कर्तृपदम् किम्?

(क) विद्यया (ख) मनुष्यः
(ग) स्वकीयं (घ) कर्त्तव्य

(ii) मुख्यम् इति पदस्य अत्र किं पर्यायपदम्?

(क) प्रधानम् (ख) अकर्त्तव्यम्
(ग) स्वकीयं (घ) सन्मार्गम्

(iii) पुण्यम् इति पदस्य अत्र किं विलोमपदम्?

(क) अकर्त्तव्यम् (ख) लाभः
(ग) पापम् (घ) हानिः

(iv) धनम् - अस्य पदस्य विशेषणं किम्?

(क) विद्या (ख) श्रेष्ठम्
(ग) सन्मार्गम् (घ) कर्त्तव्यम्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मकं-कार्यम् - ( 15 अङ्काः )

2 **भवान् महेन्द्रप्रतापः। भवता इदं पत्रं ग्रीष्मावकाशस्य सदुपयोगाय स्वं पुत्रम् अक्षयं प्रति लिखितम्। अस्मिन् पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत -** 5

शिवशक्तिसदनम्

(i) ____

प्रिय पुत्र (ii) !
शुभाशिषः।

ह्यः एव तव मात्रा सह (iii) ____ वार्तालापः अभवत्। ज्ञातम् मया यत् तव ग्रीष्मावकाशः आरब्धः। त्वं च दिने एकादश-द्वादशवादन-पर्यन्तं यथेच्छं निद्रां करोषि। सौम्य, एतद् उचितम् नास्ति। मन्ये विद्यालय-गमनाय वयं प्रतिदिनं प्रातः (iv) ____। अवकाशस्य दिवसाः तु विश्रामाय एव भवन्ति परं त्वम् एतदपि सम्यक् जानासि यत् प्रातःवेला अमृतवेला अपि भवति। सामान्यदिवसेषु विद्यालय-गमन- कारणात् (v) ____ अवसरः न प्राप्यते। अतः प्रतिदिनं प्रातः पञ्चवादने उत्थाय, उद्यानं गत्वा व्यायामः कर्तव्यः। एषु अवकाश-दिवसेषु अस्य आनन्दः न त्यक्तव्यः। प्रातःभ्रमणेन, स्वच्छवायुसेवनेन च मनः (vi) ____ शरीरं च स्वस्थं भवति। स्नान-भोजनादिकं कृत्वा गृहमागत्य दत्तचितः भूत्वा नववादनतः द्वादशवादनपर्यन्तम् पठितव्यम्। तदा मध्याह्ने भोजनानन्तरम् (vii) ____ निद्रां कुरु। तदा सायंकाले मित्रादिभिः (viii) ____ खेलनम् अथवा अन्यद् किमपि करणीयं कार्यं करोतु। एवं च ग्रीष्मावकाशस्य आनन्दम् अनुभवतु। एकवारं पुनः स्मारयामि प्रातःकालस्य (ix) ____ आलस्येन निद्रया च न यापयितव्या। गृहे सर्वेभ्यः

शुभाशिषः।


तव शुभाकांक्षी पिता

(x) ।

**मञ्जूषा**

दूरभाषेण, अमृतवेला, महेन्द्रप्रतापः, यथेच्छं, गान्धीनगरात्, उत्तिष्ठामः, अक्षय, प्रातःभ्रमणस्य, प्रसन्नम्, सह

3 **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** 10



**मञ्जूषा**

क्रिकेट–क्रीडां, बालकाः, महिले, क्रीडाक्षेत्रे, वृक्षाः,भ्रमतः, क्रीडन्ति, गृहाणि, कारयानानि, प्रसीदन्ति, बहिः, देशे, आई.पी.एल. क्रिकेट, भवति, पश्यति

अथवा

**स्वविद्यालये भवान् प्रार्थनासभायां प्रथमवारं वार्ताः पठति। स्वमनोदशां वर्णयन् पञ्च वाक्यानि संस्कृतेन मञ्जूषापदसहायतया लिखतु।** 10

**मञ्जूषा**

प्रथमवारम्, शिक्षकस्य आदेशः,मुखं शुष्यति, चित्तं, व्याकुलम्, हस्तौ कम्पेते, शिक्षकस्य संकेतः, अतीव, साधु, शोभनम्, आत्मविश्वासः, जागृतः, छात्राः, करतलध्वनिम्, पितरौ, प्रसन्नौ

**खण्डः 'ग'**

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 **अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत -** 4

(i) य् - वर्णस्य उच्चारणस्थानम् लिखत।

(ii) कीर्तिमानम् - इति पदे मूर्धन्यं वर्णं लिखत।

**रिक्तस्थानं पूरयत -**

(iii) शोभायात्राम् - श् + ओ + भ् + आ + य् + आ + त् + __________ + आ + म्

(iv) स् + व् + अ + त् + अ + न् + त् + र् + अ + त् + आ = __________

5 **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -** 5

(i) <u>यदि + अपि</u> भवान् परिश्रमम् करोति, तथापि फलम् न प्राप्नोति।

(अ) यदपि (ब) यद्यपि (स) यदीपि (द) यधपि

(ii) <u>अत्र + अन्तरे</u> माधवः तत्र आगतः।

(अ) अत्रान्तरे (ब) अत्रन्तरे (स) अत्रानतरे (द) अत्रनतरे

(iii) <u>सत् + चरित्रम्</u> पालयेत्।

(अ) सत्चरित्रम् (ब) सद्चरित्रम्

(स) सच्चरित्रम् (द) सचरित्रम्

(iv) कक्षायाम् <u>वाक् + ईशः</u> श्रेष्ठः छात्रः अस्ति।

(अ) वाकीशः (ब) वाकेशः (स) वागीशः (द) वागेशः

(v) विद्यालये <u>इतः + ततः</u> भ्रमन्तः छात्राः कोलाहलम् कुर्वन्ति।

(अ) इतोततः (ब) इतोश्ततः (स) इतष्ततः (द) इतस्ततः

6 **प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वारिक्तस्थानानिपूरयत -** 5

(i) ______ कालिदासः 'अभिज्ञानशाकुन्तलम्' व्यरचयत्।

(अ) कविः (ब) कवी

(स) कवयः (द) कविभ्याम्

(ii) हिमालये______तपस्यां कुर्वन्ति।

(अ) साधुः (ब) साधवः

(स) साधू (द) साधुषु

(iii) शिशोः______ चारुतरम् भवति।

(अ) मुखः (ब) मुखोः

(स) मुखे (द) मुखम्

(iv) मम् ________ नाम रचना अस्ति।

(अ) भगिन्या: (ब) भगिनि

(स) भगिनी (द) भगिन्या

(v) अहम् ______ पश्यामि।

(अ) त्वम् (ब) तुभ्यम्

(स) त्वत् (द) त्वाम्

7 **उचितधातुरूपाणि चित्वा रिक्त-स्थानानि पूरयत -** 5

(i) अद्य मम पिता आगत:, स: श्व: ______ ।

(अ) गमिष्यामि (ब) गमिष्यति

(स) गमिष्यन्ति (द) गमिष्याम:

(ii) ये परिश्रमं कुर्वन्ति, ते सफलतां ______ ।

(अ) लभते (ब) लभे

(स) लभध्वे (द) लभन्ते

(iii) यूयं प्रात: कं दृष्ट्वा ______ ?

(अ) अहसत् (ब) अहसन्

(स) अहसत (द) अहस:

(iv) तौ गुरुम् ______ ।

(अ) सेवे (ब) सेवते

(स) सेवेते (द) सेवन्ते

(v) वयं संस्कृतं ______ ।

(अ) पठन्ति (ब) पठथ

(स) पठाम: (द) पठामि

8 **अधोलिखिते अनुच्छेदे रिक्तस्थानानि कोष्ठकगतशब्देषु उचितविभक्तिप्रयोगेन पूरयत।** 5

'जलम् एव जीवनम्' एतत् कथनम् सत्यम्। नर: जलेन विना जीवितुम् न शक्नोति। (भूमि) ___(i)___ अध: जलम् भवति, अत: जलप्राप्त्यर्थम् जना: कूपखननम् कुर्वन्ति। विलासस्य (गृह) ___(ii)___ पृष्ठत: अपि एक: कूप: अस्ति। प्रात: अनेका: नार्य: (तद्) ___(iii)___ परित: एकत्रिता: भवन्ति ___(iv)___ (कूप) जलम् च बहि: आनयन्ति। अहम् अपि (अम्बा) ___(v)___ सह तत्र गच्छामि।

9 **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं लिखत।** 6

(i) काक: जलं <u>पीत्वा</u> तृप्त: अभवत्।

(ii) वयं संस्कृतम् अवगन्तुं प्रयत्नं कुर्मः।

(iii) श्वेतकेतुः वेदान् अधि+इ+ल्यप् पितुः सकाशम् आगच्छत्।

(iv) राजा युध्+क्त्वा जयं प्राप्नोति।

(v) भरतः रामम् आ+नी+तुमुन् वनम् अगच्छत्।

(vi) खगाः जालेन सह उत्पत्य अगच्छन्।

## खण्ड : 'घ'

## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

सर्वथा दैवम् आलस्यं च विहाय पुरुषार्थःविधेयः। एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान्। राजा उवाच - 'भोः भोः पण्डिताः! श्रूयतां मम वचनम् - अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?' अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अब्रवीत्-'देव! महाकुलसम्भूता एते राजपुत्राः मया नीतिं ग्राहयितुं शक्यन्ते। अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि।'

I. **एकपदेन उत्तरत।**

(i) के महाकुलसम्भूताः आसन्?

(ii) राजा केन प्रकारेण अनधिगतशास्त्राणाम् पुत्राणां पुनर्जन्म कारयितुं इच्छति स्मः ?

II. **पूर्णवाक्येन उत्तरत।**

किम् चिन्तयित्वा राजा पण्डितसभां कारितवान्?

III. **उचितम् उत्तरं चित्वा लिखत -**

(i) 'श्रूयतां मम वचनम्' अत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) राज्ञे (ब) विष्णुशर्मणे
(स) राजपुत्राय (द) नीतिशास्त्राय

(ii) 'सन्मार्गगामिनः' अस्य किं विलामपदम् अत्र प्रयुक्तम्?

(अ) पुत्राः (ब) पण्डिताः
(स) विद्वान् (द) उन्मार्गगामिनः

11 **अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** 5

यदि सत्सङ्गतिरतो भविष्यसि भविष्यसि।

अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि।।

I. **एकपदेन उत्तरत।**

(i) कुत्र स्थित्वा जनस्य कल्याणम् भवति?

(ii) कस्मिन् रतः जनः सफलः भवति?

II. **पूर्णवाक्येन उत्तरत ।**

कुसंगात् किम् भवति?

III. **यथानिर्देशम् उत्तरत –**

(i) भविष्यसि इति क्रियायाः कर्तृपदम् किम्?

(क) सत्संगतिः (ख) सत्सङ्गतिरतो

(ग) त्वम् (घ) यदि

(ii) सत्संगतिः इति पदस्य अत्र किं विपर्ययपदम्?

(क) संसर्गः (ख) कुसंगतिः

(ग) सत्सङ्गतिरतो (घ) दुर्जनसंसर्गे

12 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

रामः – वत्स लक्ष्मण! किमेवं भरतः प्राप्तः?

लक्ष्मणः – आर्य! अथ किम्?

सीता – आर्यपुत्र! किं भरतः आगतः?

रामः – मैथिलि! अथ किम्?

अद्य खल्ववगच्छामि पित्रा मे दुष्करं कृतम्।

कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः।

I. **एकपदेन उत्तरत।**

(i) 'मैथिली' का आसीत्?

(ii) 'पित्रा में दुष्करं कृतम्' इति स्नेहभावेन कः वदति?

II. **पूर्णवाक्येन उत्तरत।**

रामः लक्ष्मणम् किम् अपृच्छत्?

III. **उचितम् उत्तरम् चित्वा लिखत –**

(i) 'पुत्रः' इत्यस्य किम् पर्यायपदम् पद्यांशे अस्ति?

(अ) आर्यपुत्रः (ब) वत्सः (स) तनयः (द) आर्यः

(ii) 'आर्यपुत्र!' इति सम्बोधनपदम् अत्र कस्मै प्रयुक्तम्?

(अ) रामाय (ब) लक्ष्मणाय (स) पित्रे (द) भ्रात्रे

13 I. **अधोलिखितेषु सूक्तेः शुद्धम् भावम् चीयताम् —** 4

(i) मार्गारब्धाः सर्वयत्नाः फलन्ति।

(अ) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।

(ब) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गेण सोद्देश्यं प्रारभ्यन्ते।

(स) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।

(ii) स जातो येन जातेन याति वंशः समुन्नतिम्।

(अ) यस्य जन्मना एव वंशः समुन्नति याति।

(ब) यस्य जन्मनः पश्चात् वंशः समुन्नतिं याति।

(स) यस्य गुणकर्मभ्यां तस्य वंशः सर्वविधाम् उन्नतिं करोति।

II. **प्रदत्तविकल्पेभ्यः रिक्तस्थानानि पूरयत।**

अद्य खल्वगच्छामि पित्रा मे दुष्करं कृतम्।

कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः आसीत्।

**भावार्थः**

श्रीरामः चिन्तयति यत् अद्य अहम् ज्ञातवान् यत् मम (i)____ महयम् वनवासं दत्त्वा मम च वियोगं सोढ्वा अतीव (ii)____ कार्यं कृतवान्। यतः यदि भ्रातुः (iii)____ ईदृशो वर्तते तर्हि (iv)____ स्नेहः कीदृशः आसीत्।

**मञ्जूषा**

पिता, पुत्रस्य, स्नेहः, दुष्करं

14 **निम्नलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत।** 4

(i) सद्भिस्तुलीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्।।

अन्वयः - (i)____ तु लीलया प्रोक्तम् (ii)____ अक्षरम् (इव भवति)। असद्भिः शपथेन (iii)____ जले (iv) अक्षरम् (इव भवति)।

(ii) गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।

अन्वयः -गच्छन् (v)____ योजनानां (vi)____ अपि यति। (अस्य विपरीतम्) अगच्छन् (vii)____ अपि एकं (viii)____ न गच्छति।

**मञ्जूषा**

पदं, पिपीलिकः, सद्भिः ,लिखितम्, वैनतयः, शिलालिखितम्, शतानि, अपि

15 **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

(i) असद्भिः शपथेन प्रोक्तं जले लिखितम् अक्षरं भवति।

(ii) अनुजस्य पठने रुचिः न अस्ति।

(iii) सः तव पादुके मह्यं प्रयच्छति।

(iv) वैरं न रोचयेत्।

16 अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत। 4

(i) गृहम् आगत्य माधवः रक्तविलिप्तं नकुलं पश्यति।

(ii) माधवः स्वपुत्रस्य रक्षार्थं नकुलम् व्यवस्थाप्य राज्ञः समीपे गच्छति।

(iii) बालकोऽनेन खादितः इति अवधार्य तेन नकुलः व्यापादितः।

(iv) नकुलः बालकस्य समीपे उपसर्पन्तं सर्पम् पश्यति।

(v) सर्पम् मारयित्वा नकुलः रक्तेन विलिप्तः भवति।

(vi) माधवः नाम विप्रः आसीत।

(vii) विप्रः पश्चात्तापेन दुःखो भवति।

(viii) तस्य भार्या स्नातुं गच्छति।

17 प्रसङ्गानुसारम् रेखाङ्कितपदानाम् उचितम् अर्थम् चित्वा लिखत। 4

(i) चक्षुः श्रोत्रं घ्राणं जिह्वा त्वक् च इति पञ्चेन्द्रियाणि।

(अ) नासिका (ब) श्रुतम् (स) शास्त्रम् (द) कर्णः

(ii) काले हित-मित-मधुरार्थवादी स्यात्।

(अ) अल्प (ब) अत्यधिक (स) सत्य (द) प्रिय

(iii) बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति।

(अ) रक्त-विलिप्तः (ब) हतः (स) कुपितः (द) स्वस्थः

(iv) सः वेदान् अधीत्य पितुः सकाशम् आगच्छत्।

(अ) दूरे (ब) सह (स) समीपम् (द) सदृशम्